१विशेषणापेक्षाभावे समर्थसूत्रभाष्योक्ते अवयवार्थानपेक्षया समुदायस्य विशेष्यविशेषणभावानवगाहेत्रकोपस्थिति जनकत्वरूपे २एकार्थीभावे च। “समर्थः पदविधिः” पा० सूत्रे सामर्थ्यं द्विविधं व्यपेक्षा अव्यपेक्षा च प्रपञ्चितमस्माभिः सरलायाम्। तत्र स्वार्थपर्य्यवसायिपदानामाकाङ्क्षादिवशात् यः परस्परं सम्बन्धः सा व्यपेक्षा। राज्ञः पुरुष इत्यादौ वाक्ये सत्यामाकाङ्क्षायां यो यो यस्मिन् सन्निहितो योग्यश्च स तेन तेन सम्बध्यते यथा राज्ञः पुरुषोऽश्वश्च राज्ञो देवदत्तस्य च पुरुषः ऋद्धस्य राज्ञोऽश्वो धनञ्चेत्यादि वृत्तौ तु नैवम् वृत्तीनामेकार्थीभावात्। एकार्थीभावश्च विशेष्यविशेषणभावावगाहेत्रकोपस्थितिजनकत्वम्। तथाच राजपुरुषादिशब्देन विशिष्टैकार्थबोधकतया न तदेकदेशे ऋद्धादेरन्वयः पुरुषांशे विशेषणतयोपस्थितस्य च नाश्वादिसम्बन्धिता राजादीनाम्। जनितान्वयाच्च निराकाङ्क्षतया न देवदत्तादेः स्वामितया पुरुषादावन्वय इति द्रष्टव्यम्। देवदत्तस्य गुरुकुलमित्यादौ देवदत्तादेस्तु प्रधानीभूतकुलादिनैवान्वयः सम्बन्धस्तूपस्थितगुरुद्वारक एव षष्ठ्यर्थः यथोक्तं हरिणा “समुदायेन सम्बन्धो येषां गुरुकुलादिना। संस्पृशावयवास्ते तु युज्यन्ते तद्वता सहेति”। यद्वा सम्बन्धिशब्दार्थस्य पदार्थैकदेशत्वेऽपि भवत्येव केषाञ्चित् सम्बन्धान्वयः तदुक्तं तेनैव “सम्बन्धिशब्दः सापेक्षो नित्यं सर्व्वैः समस्यते। वाक्यवत् सा व्यपेक्षापि वृत्तावपि न हीयते”। अतएव वार्त्तिककृता “सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इति वक्तव्यमिति”सामान्यतो वृत्तिमतो विशेषणस्य स्वातन्त्र्येण प्रयोगाभावमभिधायम् “अगुरुकुलगुरुपुत्रादीनां वक्तव्यम्”इत्यनेन गुरुकुलगुरुपुत्रादीनां विशेषणत्वेऽपि पृथक्प्रयोगाय नञा पर्य्युदासः कृतः। समानाधिकरणविशेषणस्य तु “समानाधिकरणमसमर्थवद्भवती”त्यनेन सर्व्वथा स्वातन्त्र्येण सामर्थ्याभावात् प्रयोगाभावो भङ्ग्याऽभिहितः। एतन्मूलकमेव प्राचां गाथा “सापेक्षे प्रत्ययो न स्यात् समासो वा कथञ्चन। सापेक्षं तद्विजानीयादसमस्तविशेषणम्। प्रतियोगिपदादन्यत् यदन्यत् कारकादपि। वृत्तिशब्दैकदेशस्य सम्बन्धस्तेन नेष्यते” इति अत्रायं विशेषः प्रधानस्य सापेक्षत्वेऽपि समास इत्युक्तेः प्रधानस्य वृत्त्युपस्थाप्यविशेष्यस्य राजपुरुषादेः सुन्दरादिविशेषणापेक्षायामपि समासः। समासे चावयवशक्त्यैव तत्तदर्थपदार्थोपस्थित्या विशेष्यविशेषणभावाद्यभ्युपगमे सापेक्षत्वादौ समासाभावादिकं वाचनिकं कल्प्यम् तथान्याप्यधिककल्पना स्यादतः समुदायशक्तिकल्पनम् यथोक्तं हरिणा “बहूनां वृत्तिधर्म्माणां वचनैरेव साधने। स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः। चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम्। कर्त्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितमिति”तथाहि द्वन्द्वादिविग्रहवाक्ये चकारादि प्रयुज्यते समस्ते तु न। वचनैरेव तन्निषेधः कल्पनीयः। समुदायशक्तिपक्षे तु उक्तार्थानामप्रयोग इत्युक्तन्यायादेव सिद्धम्। नामार्थयोरभेदान्वयः क्लृप्तः सच राजपदादुपस्थापितराजादेः पुरुषे स्वस्वामिभावसम्बन्धेनान्वये परित्यक्तः स्यात्। सम्बन्धलक्षणायान्तु किमपराद्धम् विशिष्टलक्षणया। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानमिति नियमश्च क्लृप्तः सच प्राप्तानन्दादौ भज्येत आनन्दकर्त्तृकप्राप्तिकर्म्मत्वार्थबोधस्योभयसम्मतत्वेन कर्त्तृविहितक्तान्तार्थस्य कर्त्तुर्विशेष्यतौचित्येन प्रकृते तद्वैपरीत्यात् आनन्दसम्बन्धादिलक्षणास्वीकारे समुदायशक्तिपक्ष एव प्रवेशः। तथा प्राप्त आनन्दोयमिति विग्रहे आनन्दादौ अत्यन्तादिविशेषणयोगवत् समासे तद्वारणाय वृत्तस्य न न विशेषणयोग इति वाचनिकत्वकल्पनाऽधिका एतन्मते न्यायसिद्धा इत्यादिबहुविप्लवापत्तिरतः समुदाये शक्तिः”. नास्ति व्यपेक्षा यस्य। २अनपेक्षे त्रि०।

**अव्यभिचरित** त्रि० वि+अभि+चर–क्त न०त०। १व्यभिचारशून्ये हेतौ ‘का व्याप्तिः? न तावदभिचरितत्वं तद्धि न साध्याभाववदवृत्तित्वम्’ अनुमानचिन्ता० व्यभिचारश्च द्विविधः अन्वयव्यभिचारोव्यतिरेकव्यभिचारश्चेति भेदात् अन्वयव्यभिचारोऽपि द्विधा। साध्याभाववद्वृत्तित्वं स्वसमानाधिकरणाभावप्रतियोगिसामानाधिकरण्यं चेति भेदात् यथा धूमवान् वह्नेरित्यादौ धूमाभाववति तप्तायः पिण्डे वह्नेर्वृत्तिमत्त्वात्, वह्न्यधिकरणे तप्तायःपिण्डे धूमाभावस्य विद्यमानतया तत्प्रतियोगिना सह समनाधिकरणत्वात् वह्नौ उभयविधव्यभिचारः। साध्याभावव्यापकीभूताभावप्रतियोगित्वं व्यतिरेकव्यभिचारः यथा धूमवान् वह्नेरित्यादौ धूमाभावरूपसाध्याभावस्य तप्तायःपिण्डे सत्त्वेन वह्न्यभावस्य च तत्रासत्त्वात् वह्नेर्न साध्याभावव्यापकीभूताभाव प्रतियोगित्वम्। इति तत्र उभयविधव्यभिचारः। २अबाधितार्थे च “अव्यभिचरितेभ्यः प्रमाणेभ्यः” शा० भा०।

**अव्यभिचारिन्** त्रि० वि+अभि+चर–णिनि न०त०। केनापि प्रतिकूलहेतुना १निवारयितुमशक्ये। न्यायमते २साध्यसाधकव्याप्तिविशिष्टे हेतौ च। ३अबाधितविषये च